श्रीसहजानंदस्वामिनेनमोनमः ॥ यत्कर्णमारुतहता गिरयोयुगांते चूर्णीभवंति किल मेरुहिमाचलाद्याः ॥ पा
तालकेलिषु चयः पृथिवीदत्तोऽग्रे धृतवान्स्वयं स तदिनातान्मतिमत्र योगपाम् ॥१॥ अथ धर्मदेवसंस्कारादीन्निवर्ण
यिषुः कविराजोऽत्रभवांश्चतुर्थं सर्गमारभते चक्रुरिति तदानीं धर्मदेवजन्मक्षणएव वृंदारकाः क्रतुभुजः क्रतु
भुजोगीर्वाणादानवारयः वृंदारकाइत्यमरः नभस्तोनभसः पंचम्यास्तसिल् सुमनसां पुष्पाणामभिवृष्टिमभि
तोवर्षेस्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमं नचदृष्टिर्वर्षमितिचामरः चक्रुर्निष्पादयामासुः दुंदुभिवादनं भे

चक्रुर्नभस्तः सुमनोऽभिवृष्टिं वृंदारकादुंदुभिवादनं च ॥ सुरांगनावृंदमनृत्यदभ्रे गंधर्वसंघाविजगुस्तदानीम् ॥ २
उच्चारयामासुरमूसहर्षो वेदं त्रिलोक्यामपि भूमिदेवाः ॥ तदाधरित्रीहरितः प्रसेदुः सुमंगलोद्भासिपुरव्रजाद्याः
३ ॥ रीनिनादं च भेरीस्त्री दुंदुभिः पुमानित्यमरः वृंदारकाश्चानकवादनं चेति पाठे आनकः पटहः आनकः प
टहोऽस्त्री भेर्यादित्यमरः चक्रुः अभ्रेद्युवियोम्नीतियावत् द्योदिवौद्वेस्त्रियामभ्रंव्योमपुष्करमंबरमित्यमरः सु
रांगनानामप्सरसां वृंदं यूथमनृत्यत् ननर्त गंधर्वाणां देवगायकानां संघाः समूहाश्च विजगुः गानं चक्रुः ॥ वृं
दं लक्षणं तुरुकं प्राक् ॥ १ ॥ उच्चारयामासुरिति भूमिदेवा ब्राह्मणा द्विजा अग्रजन्म भूदेववाडवाः विप्रश्च ब्राह्म ॥१॥

णोऽस्मावित्यमरः वेदं वेदमंत्रानित्यर्थः उच्चारयामासुः पठन् तत्पूर्वोक्तस्वार्थेतिजंतान्नच्च रवेर्लिट् त्रयाणां लोका
नां समाहारस्त्रिलोकी तस्यामपि भूरादिलोकत्रये पि तद्धितार्थोत्तरपदसमाहारे चेति समाहारे समासः संख्या
पूर्वोद्विगुरिति द्विगुसंज्ञः अकारांतरपदोद्विगुः स्त्रियामिष्टइतिस्त्रीलिंगत्वात् द्विगोरिति ङीप् ॥ सहर्षेण
आनंदेनाऽभूद् इतिन दासस्मिन्नवसरे धरित्री धराधरित्री धरणीत्यमरः कृष्टयानिमंगलानितैरुद्भासिनः शोभ
मानाः पुराणां व्रजाः समूहास्ते आद्यो येषां ग्रामादीनां पत्तनपुराणि च व्रजा गोष्ठस्थानानि च ते आद्या पुरग्रामाये

आसीन्महामंगलतूर्यनादो विधूमरोचिर्द्विजजातवेदाः ॥ स्रोतस्वती कूपसरोजलानि प्रसन्नतां साधुमनांसिच
वापुः ॥ ३ ॥ प्रेतेतथोत्काः सुमंगलोद्भासिनः पुरव्रजाद्याः पश्यांत तथाभूता व्रजो गोष्ठाध्ववृंदेष्वित्युभयत्र विश्व
अभूत् हरितो दिशः प्रसेदुः प्रसन्ना बभूवुः दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताइत्यमरः ॥ ३ ॥ आसी
दितिमहांतियानिमंगलानितेषां तूर्यनादस्तदर्थे मुरजादिवादित्रध्वनिः अश्वघासादिवत्षष्ठीसमासः न
तु तादर्थ्ये चतुर्थीसमासः चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरिति सूत्रे बलिरक्षितग्रहणाज्ज्ञापकात्तद
र्थेन प्रकृतिविकृतिभावएवैव ग्रहणात् आसीत् बभूव द्विजानां ब्राह्मणानां जातवेदाज्ज्वलनः विधूतेसमले

इतिवेदोधनंज्ञातंवेदोधनंयस्मात्ज्ञातंवेत्तिवेदयतेवाविद्वेतनादौ अस्फुरत्स्फटिकयोनिर्जलनोजातवेद
इत्यमरः विगतोधूमोयस्मात्तद्रोचिः प्रभायस्यसः रोचिःशोचिरुभेक्लीबेइत्यमरः जाज्वल्यमानोऽभूत् स्रोत
स्वतीतरंगिणीनदीतियावत् स्रोतांसिसंत्यस्याः मतुप् अस्मायेतिविनोतुस्रोतस्विन्यपिस्रोतस्विन्यमवकू
पान्यंधवस्थ्यसरांसिचतेषांतलानि तरंगिणीशैवलिनी तटिनीह्रदिनीधुनीस्रोतस्वती अंधुप्रहीकूपउद
पानंतुपुंसिवेतिचामरः साधूनांसत्पुरुषाणांमनांसिचेतांसिचप्रसन्नतांनिर्मलतामवापुरगमन् ॥ २ ॥ नभ
नभोभृशंनिर्मलतांप्रपेदेववौमरुन्मंदसुगंधियुक्तः ॥ सिद्धाजयध्वानमवोचुरुच्चैर्दत्तातदर्षिप्रवरैःसदाशीः
३ ॥ इति तदातस्मिन्कालेनभोगगनं नभोंतरिक्षंगगनमित्यमरः निर्मलतांमलराहित्यंप्रपेदेप्रापत् ॥ मं
दश्चासौसुगंधिश्चसचासौयुक्तस्य मंदःसुगंधिःयुक्तश्चेत्यर्थः ॥ विशेषणसमासः मरुत्पवनः मरुतो
पवनामरावित्यमरः ॥ ववौअवात् सिद्धादेवयोनिविशेषाः सिद्धोभूतोऽमीदेवयोनयइत्यमरः ॥ उच्चैरुन्न
तंजयध्वानंजयध्वनिंशब्देनिनादनिनदध्वनिध्वानरवस्वनाइत्यमरः अवोचुरब्रुवन् ॥ ऋषिप्रवरैर्ऋषि
मुख्यैः सतीससाचासावाशीश्चाशीर्वादवाक्दत्तादिताअभवदितिशेषः इत्यसर्वेशुभमत्रासिन्निभूवेतिभावः ॥ ४ ॥३॥

महेति आप्लुतः पुत्रजन्मश्रुत्वानंतरंस्नातः मदनपारिजातेवसिष्ठः श्रुत्वाजातंपितापुत्रंसचैलंस्नानमाचरेदि
तिजातेपुत्रेपितुःस्नानंसचैलंतुविधियतेइतिन्यायानंदः विष्णुधर्मेकादर्शो जिनिःप्रादुर्भावेपुत्रपुत्र्योर्ग्रहणे
चंद्रसूर्ययोः ॥ स्नात्वानंतरमात्मीयान्पितॄन्श्राद्धेनतर्पयेदितिमहामनाउदारचित्तः कुमारस्यबालकस्य
कुमारेबालकेस्कंदइतिविश्वः जन्मप्रादुर्भावस्तस्यश्रुतिः श्रवणंश्रुतिःश्रोत्रेतथाम्नायेवार्तायांश्रोत्रक
र्मणीतिविश्वः तयाभूरिःप्रचुरोहर्षोयस्यसः पिताबालस्यशर्माजातकर्मदक्षैःजातकक्रियाप्रवीणैःधराम
ह्रामनाजातककर्मदक्षैकुमारजन्मश्रुतिभूरिहर्षः ॥ धरामरैस्तस्यसुजातकर्मविधापयामासपिताप्लुतःसः
५ ॥ तानर्चयित्वाविधिवत्समस्तगंधादिभिर्ब्रह्मविदांवरःसः ॥ आकल्पवासांसिमहाधनानितेभ्योददौप्रीतम
नाविधिज्ञः ॥ ६ ॥ ब्राह्मणैःपयोसुकर्तृभिः तस्यसुतस्यजातकर्मतन्नामकंसंस्कारंविधापयामासकारयामा
सविपूर्वाद्धेतुमणिजंतात्प्रधानेलिंटस्यपुत्रोदयापेतिभावः ॥ ५ ॥ तानिति ब्रह्मविदांवेदविदांवेदस्तत्वंतपोब्र
ह्मेत्यमरः वरःश्रेष्ठः प्रीतंप्रसन्नंमनोयस्यसः विधिंदानप्रदानविधानंजानातीतिज्ञावबोधने स्मातुः आतो
नुपसर्गेकइतिकः विधिर्विधानेदैवेपीत्यमरः सःबालस्यशर्मातान्येजातकर्मकारितंतानिसर्थः विधिवद्य(

हरिसं·

॥२॥

सर्ग-४

यानि तत्प्रसूनानि कुंकुमानि च गंध आमोद इति त्रिष्वपि चंदनं च ॥ आधाराधेयभावेन जन्यजनकभावेन वा गं
धचंदनयोरभेदोपचारः गंधो गंधक आमोद इति विश्वः तावादी येषां कुंकुमादीनां तैः अर्चयित्वा संमान्य
तेभ्यो द्विजेभ्यः महाधनानि महामूल्यानि आकल्पनेपथ्येन वेषं वा विना तद्व्यसादकमाभरणं लक्ष्यते आक
ल्पा आभरणानि च वासांसि वस्त्राणि च आकल्पः कल्पने वेष इति विश्वः तानि ददौ वितेतार ॥ ३ ॥ ऊर्जत्विति
प्रेम स्नेहः प्रेम नर्मणि च स्नेह इति विश्वः तस्य भरोऽतिशयः भरोऽतिशयभारयोरिति विश्वः सत्प्रांतरात्मनि
ऊर्जस्विनं दीर्घभुजं प्रनूनं तं नवीनपाथोधरनीलगात्रम् ॥ तं देववर्मेति चकार नाम्ना स्रुतं पिता प्रेमभरांतरा
त्मा ॥ ४ ॥ पित्रोः प्रियोऽसौ कृतपोषणेन ताभ्याममदभ्रंक चिरस्तनूजः ॥ अपर्वर्द्धतानंदितबंधुवर्गो निरंतरं बाल
इवोडुराजः ॥ ५ ॥ तः करणे यस्मात्सो पिता बालत्वाद्भर्मा ऊर्जः पकाजोबलं दीप्तिर्वास्यास्तीति अस्मायेति विनि:
तं ऊर्जस्तेजस्विधात्वनामवत् दीर्घभुजकान्त्योः ऊर्जो बले वदीप्तो चेति विश्वः दीर्घो भुजो यस्य तं प्रकर्षेणान्नतं नना
तादृतिं नवीनः सद्यः संभृतसलिलोपः पाथोधरो मेघस्तद्वन्नीलं स्निग्धतनुषामं गात्रमंगं यस्य तं तं पूर्वं वर्णितं
सुतं पुत्रं नाम्ना अस्य यादेववर्मा इति चकार एतद्दाख्याम करोदित्यर्थः निपातेनेतिनाभिहिते कर्मणि प्रथमा । अपि ॥३॥

त्रो रिति पित्रोर्मातृपित्रोः पितामात्रेत्येकशेषः प्रियः प्रेमास्पदं असौ पूर्ववर्णितगुणः तनूजस्तनयः ताभ्यां
मातृपितृभ्यां कृतं यत्पोषणं तेन अदभ्रं बहु अदभ्रं बहुलं बहु इत्यमरः रुचिरः सुंदरः अत एवानंदित
आनंदं गमितो बंधुवर्गो येन स तथोक्तः सन् निरंतरं सदा शुक्लपक्षे बालो द्वितीयादृष्टः उडुराजश्चंद्र इव अ
वर्द्धत अंगलावण्यपुष्टो वेत्यर्थः उपमालंकारः ॥ ६ ॥ अथेति अथो गर्भाद्धोपनयनयोग्यवयः प्राप्य नतरं नि
जेनात्मीयेन गुरुणा सगुरुरर्थः क्रियाः कृत्वा वेदमस्मै प्रयच्छतीत्युक्तलक्षणेन उपनीतः कृतमौंजीबंधनसंस्का
अथोपनीतो गुरुणा निजेन चकार वेदाभ्यसनं कुमारः ॥ वर्णिव्रतं द्वादशवर्षमार्यो रक्षन्नसत्सु गुरोरनुकूलवृत्ति
लः ॥ ७ ॥ रः गुरुर्महस्तोऽगिरसे पित्रादौ धर्मदेशके अलघौ कुंजरे चापीति हेमः आर्यः सत्तनतायुक्तः कुमारः
स देववर्मा आद्वादशवर्षं द्वादशवर्षपर्यंतं वर्णिव्रतं वर्णः पलाशदंडो ऽस्यास्तीति वर्णी ब्रह्मचारी वर्णी ब्रह्मचा
रिणीति निप्रत्ययः वर्णः प्रशस्तिरस्यास्तीति वा तदुक्तं ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥ संक
ल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्ट
लक्षणमिति ॥ एतदष्टविधमैथुनाभावः प्रशस्तिः तस्य व्रतं तत् सद्गुरोर्धर्मनिष्ठत्वाच्छोभवगुरोरनुकूलेऽ

प्रतिकूलं त्रीलं सङ्कृत्रं यस्य तथाभूतः सन् त्रीलं निष्ठावशीलं च चारित्रं चरित्रं तथेति रत्नकोशः रक्षन् पालयन् वेदा
भ्यसनं वेदाभ्यासं चकार करोति स्म वर्णित्रतमेतद्रूप कुर्वाणः परं तस्य सावधिब्रह्मचर्यत्वात् ॥९॥ असमयेति सुधु
धीर्मतिर्यस्मात्सो धीः प्रज्ञा मनीषा धिषणा मतिरित्यमरः द्विजेषु ब्राह्मणेषु इंदुः निर्द्धारणे षष्ठीसमासनिषेधात् पुरुषोत्तम
वत्समासः सतां मतः सद्भिः पूज्यः मतिबुद्धीसादिना क्तप्रत्ययः क्तस्य च वर्त्तमाने इति षष्ठी महनीया पूज्या कीर्तिर्यस्य
उदारो दाता प्रहस्त्वाउदारो दातृमहतोः दीक्षितोत्वभिधेयवदिति कोशात् दक्षिणो वा असौ देवशर्मा असमयकालेन॰

असमयकालेन सुधीरधीत्याम्नायार्थं द्विजेंदुः श्रुतिनिगमजालम् ॥ सतां मतोऽसौ महनीयकीर्तिर्भार्यामुदारः परिणेतुमैच्छ
त् ॥१०॥ कोसलदेशे उदारसिंधुर्मनोरमाख्यत्र पवित्रमस्ति ॥ तीर्थं मखोदाख्यमघप्रणाशं साकेतपूर्या दिशि चोत्तर
स्याम् ॥११॥ श्रुतिनिगमजालं श्रुतयो वेदाः श्रुतिर्वेदश्च वस्य पीति वैजयंती निगमाः शिक्षादीनि तेषां जालं वृंदं
जालं गवाक्ष आनाय कोरके दंभ वृंदयोरिति विश्वः अर्थेनाभिधेयेन सह वर्त्तत इति सार्थं अर्थोऽभिधेय इत्यमरः अ
धीत्य पठित्वा समावर्त्तनपूर्वकमिति शेषः भार्यां स्त्रियं परिणेतुं पाणिग्रहणपूर्वं स्वीकर्तुं ऐच्छत् इयेष अनुप्रासा॰
लंकारः ॥१०॥ अथ तद्विवाहं वक्तुं प्रस्तावनामाह कोसल इति कोसलाख्ये देशे शोभने कोसलसंज्ञिके नीवृ ॥४॥

ति नीवृज्जनपदो देशो विषय इत्यमरः मनोरमा एतन्नाम्नी उदारा महती चासौ सिंधुर्नदी च महानदी सर्वः उदारो दा
तृमहतोः देशे नदविशेषेऽब्धौ सिंधुर्ना सरिति स्त्रियामिति चामरः अस्ति वर्त्तते यत्र मनोरमायां पुनातीति पवित्रं म
खोदाख्यमेतन्नामकं अघप्रणाशं पापनिवर्त्तकं दुःखैनोव्यसनेष्वघमित्यमरः तीर्थं ऋषिसेवितजलप्रधानं स्थलं
निपानागमयोस्तीर्थमृषिजुष्टे जले गुराविसमरः विद्यते तच्च साकेतपूर्याः अयोध्यानगर्याः साकेतं स्यादयोध्या॰
यां कोसलानंदिनी चसेति वैजयंती पूः स्त्री पुरी नगर्यौ वेत्यमरः उत्तरस्यां दिशि अस्तीति संबंधः ॥११॥ आम्नायामि

आम्नायामुत्तरस्यां भवति स्म रुचिरः क्षुण्णयाम्नाम आदनः ख्यातस्तस्मान्महौघक्षपणपटुतरा कर्मजिनिष्ठामुपेतः
भूदेवः कृष्णशर्मा श्रुतनिगमविदां मान्यो यो महात्मा तस्मिन्नार्या भवानी समावसदमलमतिः सार्द्धमिष्टार्यशीलः ॥१२॥

निर्मलानां पापानामोघं वृंदं मलं कीट्टे पुराघे च पापे चेति विश्वः ओघं वृंदे पयोवेग इति विश्वः तस्य क्षपणं विनाशनं तत्र
पटुतरं अतिचतुरं तस्मात् पटुस्तीक्ष्णे नीरोगे च चतुरेऽस्त्रवदिति विश्वः तस्मान्मखोदाख्यतीर्थात् उत्तरस्यामाम्नायां दि
शि आम्नायान्मानधारास्त्रियोः प्रोक्ते विश्वः आम्नायो धनसंभृतः आङ्पूर्वो धायतेः आतश्चोपसर्गे इति कः पृषोदरादित्वात्
दत्वम् स्ततरां रुचिरः तु रुचिरः अतिसुंदरः क्षुण्णे स्मृत्पते इति क्षुद एतु उपसर्नेऽस्मात्कर्मणि क्तिप्रत्ययात् कत्वकात् क्षुण्ण

 

॥५॥ सुगंपयोजलं यस्मिन् सच्छुष्मयादृ तिख्यातः प्रसिद्धः इतीति शेषः ग्रामः संवसथः ग्रामः स्वरे संवसथ इति विश्वः भवति
वर्त्ततेतस्मिन् ग्रामे धर्मे वर्णाश्रमोचिते भगवदाज्ञारूपे हृष्टे यानिष्टातामुपेतः प्राप्तः श्रुतानि त्राणास्त्राणि च श्रुतं त्रा
स्त्रावधृतयोरिति विश्वः निगमा वेदाश्च निगमो वाणिजे पुर्यां कटके वेदे वणिक्पथे इति विश्वः तान् विदंतीति तथा तै
रित्यर्थः हसानां कर्त्तरि वेतिकर्त्तरि षष्ठी माननीयः पूज्यः महानात्मा धृतिर्यस्य सः आत्मा जीवे धृतौ देहे स्वभावे पर
मात्मनीति धनंजयः आर्याणां सत्पुरुषाणां अनूचीनं स्वभावः तत्त्वं इष्टं प्रियं यस्य सः अमला निर्मला मतिर्बुद्धिर्यस्य सः

बभूवतुस्तौ हरिदासवर्यौ श्रीकृष्णपादांबुजसक्तचित्तौ ॥ निरेनसौ मूर्त्तिरिति प्रसिद्धालयोः कृतास्तां कृचभीतिहर्त्री
१२॥ कृष्णनामाणं नत्तसंज्ञः भूदेवो द्विजः भवामा नार्या भवानी संज्ञया स्त्रिया सार्द्धं सह साकं सार्द्धं समं सहेत्यमरः अव
सत् निवसति स्म ॥ स्रग्धरावृत्तं अमो थर्थामांत्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति लक्षणात् ॥१२॥ बभूव
तुरिति ॥ श्रीकृष्णस्य पादांबुजे चरणकमले तयोः सक्तं चित्तं ययोस्तौ हरेः कृष्णस्य ये दासास्तेषु वर्यौ श्रेष्ठौ निरेनसौ
निष्पापौ अस्त्री पंकं पुमान् पाप्मा पापं किल्बिषकल्मषम् कलुषं वृजिनैनोघमंहो दुरितदुष्कृतमित्यमरः तौ दंपती
बभूवतुः तयोर्दंपत्योः भवात्संसाराज्जातिर्भयं तस्य हर्त्री पित्रोरिति शेषः मूर्त्तिरिति मूर्त्तिसंज्ञया प्रसिद्धा विख्याता ॥ ॥५॥

कृता पुत्री आसीत् बभूव ॥१२॥ तत्र भवकालमाह वस्विति वसवो ऽष्टौ अंकाः नव सप्त प्रसिद्धः एकः प्रसिद्धः तैर्मि
ते संवत्सरे ऽस्य वर्षे त्रयोभनेवत्सरे तथा ऊर्जे कार्त्तिके मासे पूर्णिमा च असौ तिथिश्च तस्यां राजदंता दित्वात् पूर्वप्रयोगा
र्हस्य पूर्णिमा त्वाद्वस्य परनिपातः आग्नेयमग्निर्देवताकं नक्षत्रं भरणी संज्ञितं अग्निरास्यादग्नेर्ढगिति देवतार्थे
ढक् तस्य णयादेत्वः तच्च कृत्तिकायोगश्च तौ विद्येते ऽस्यां तस्यां तथोक्तायां मसांमतु प्रवत्वं च भौमे मंगलवारे दिनांते सा

वसंक समेक मिते ऽस्य वर्षे भौमे तथोर्जे तिथिपूर्णिमायाम् ॥ आग्नेयनक्षत्रकृयोगवत्यां मूर्त्तिर्दिनांते प्रकटी बभू
व ॥१४॥ चक्रुर्डिंडिमिवादनं लघुजयेत्युच्चैः रवं निर्जराः संजातो भुवनत्रये ऽपि नतदा हर्षो गरीयान्ममौ ॥ आकाशेऽस्य
रयो विततः त्रातकृदागौरा विविचित्रं मुदान्नृसत्किंपुरुषा जगुः स्मितमुखाः सिद्धादयस्कृष्णवुः ॥१५॥ यं काले मूर्त्तिर्मू
र्त्तिसंज्ञाः कृष्णनाम्नी कृता प्रकटी बभूव प्रादुरभूत् ॥१४॥ चक्रुरिति निर्जरादेवाः अमरा निर्जरा देवा इत्यमरः डिंडिमि
वादनं भेरीध्वानं डिंडिमिर्दितिजे भेर्यामिति विश्वः चक्रुस्तान्वादयामासुरित्यर्थः लघुनाघ्री घंघक्रायां स्त्री लघुः क्ली
वं त्राघीष्टे कृष्णागरुणि पापीति त्रिकांडशेषः उच्चै रुच्चस्वरे णं जयेति रवं शब्दं च चक्रुरवदन्नित्यर्थः भुवनत्रये त्रिभुवने
तदा तस्मिन्काले संजातउत्पन्नः गरीयानतिशयेन गुरुः हर्ष आनंदो ऽपि जननानामिति शेषः नममौ प्रतिरिक्षान

इत्यर्थः सर्वभुवनजनभरणपर्याप्तेयंतन्नेमातीतिकविशेषोक्तिः सिद्धातिग्राम्यस्ततः सिद्धभेदेनाध्यवसिता
दतिशयोक्तिः मा च हर्षस्यांतः संबंधी कृत्वा संबंध असंबंधरूपः आकारोऽयोग्नि गतहृदा विद्युतरिव गौरांगो
रवर्णाः शुक्लवर्णा इत्यर्थः शंपाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा तडित्सौदामिनी विद्युच्चंचला चपला अथी
ममरः गौरः करीरे सिद्धार्थे शुक्लेपीते इति हेमः पिचेति मालती मालायाम् वाताय कपिला विद्युदातपायातिलो
हिनी पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेदिति सोतिष्विकोक्ते विद्युतः श्वेतत्वम् अवगंतव्यम् स्फुरयोषितो

शुद्धांतः करणा जनाः समभवन् यात्स्वधाम्नो हरेस्तस्मादेव दिनात् क्षितौ भगवतो भक्ताश्च तेषां मनः ॥ यत्रासन्नि
हमंदिराण्यतिमुदा जातोऽप्यत्रोत्सवो विप्राणां भृगुमान्निषष्ठललनाः प्रोचुः समेसोत्सवुः ॥ १६ ॥ अप्सरसः
निवितं पथाप्सान्नथा अनृसन्ननृतुः किंपुरुषाः किंनराः स्यात्किंनरः किंपुरुषस्तुरंगवदनो मयुरित्यमरः
जगुर्गानं चक्रुः स्मितं हासो मुखे येषां ते सिद्धाद्यस्तुष्टुवुः स्तुतिमकुर्वन्नित्यर्थः ग्राहूर्ध्वविक्रीडितं तल्लक्षणं
तूक्तं प्राक् ॥ १५ ॥ शुद्धेति तस्मादेव दिनात् तत्तन्मूर्ति जन्मदिनमारभ्येत्यर्थः स्वर्वोपि कर्माणि पंचमी जनास्तत्
भृतः शुद्धान्तःकरणानि मानसानि येषां ते तथाभूताः समभवन्नासन् हरेर्हरिसंज्ञस्य भगवतः धाम्नः स्थान ॥ ६ ॥

स्य धाम रश्मौ गृहे देहे स्थाने जन्म प्रभावयोरित्यनेकार्थसंग्रहः वादो मार्गः वादः पथश्च मार्गश्चेतिस्फ भूतिचं
द्रः अभवदिति वचनव्यत्ययः पृथक् इत्यर्थः क्षितौ पृथिव्यां तेषां पूर्वोक्तजनानां मनश्चेतः भगवतः श्रीहरेः भ
क्तौ नवविधायां अभवत् सक्तमितिशेषः यत्र येषु स्थलेषु अस्य हरेः मंदिराणि आसन् तत्र अतिमुदा उत्सवः
समभवत् विप्राणां ब्राह्मणानां ललनाः स्त्रियः स्त्री योषिदबला योषा नारी सीमंतिनी वधूः प्रतीपदर्शिनी वा
मा वनिता महिला तथा ॥ विशेषास्त्वंगना भीरुः कामिनी वामलोचना । प्रमदा मानिनी कांता ललना चेत्यमरः

वृत्तेर्द्विजैरुच्चनगालपद्भिस्तदीयसंस्कारमवेदमंत्रं ॥ विधापयामास पिता यथावद्वह्निश्रमाणानं भूरिदिदेशानेभ्यः
॥ १७ ॥ समेत्यैकीभूय भृगुनामसंतेऽमांशिष आशीर्वादान् प्रोचुः दधुः उच्चगुरुचस्वरेण गानं चक्रुरित्यर्थः वृ
त्तलक्षणं तूक्तं ॥ १६ ॥ वृत्तेरिति पिता हृद्धर्मनामा द्विजैः उच्चानि महांति नगालानि मस्तकानि विद्यते येषां तैः
उच्चैः शिरोभिर्महद्भिरित्यर्थः नगालं नरमस्तकमिति निराजशेखरः वृत्तैः वृत्तवर्णैः द्विजैर्ब्राह्मणैः प्रयोक्त
र्भिः पथावच्छास्त्रोक्तविध्यनुसारेणेत्यर्थः अवेदमंत्रं वेदमंत्ररहितं तस्या भूर्सा अयं तदीयः स चासौ सं
स्कारो जातकर्मादिश्च तं विधापयामास कारयामास अवेदमंत्रमित्यत्र संस्कारमयूखे व्यासः गर्भाधानं पुंस

वृत्तेसीमंतोजातकर्मच॥ नामक्रियानिष्क्रमोऽन्नप्राशनंवपनक्रिया॥ कर्णवेधोव्रतादेशोवेदारंभक्रियाविधिः॥
केशांतःस्नानमुद्वाहोविवाहाग्निपरिग्रहः॥ त्रेताग्निसंग्रहश्चैवसंस्काराःषोडशस्मृताः॥ नवैताःकर्णवेधांता
मंत्रवर्जंक्रियाःस्त्रियाः॥ विवाहोमंत्रतस्तस्याः शूद्रस्यामंत्रतोदश॥ इति तेभ्योविप्रेभ्यः भूरिप्रभूतंबहुळितियावत्
प्रभूतंप्रचुरंप्राज्यमदभ्रंबहुलंबहु॥ पुरुहंपुरुभूयिष्ठंस्फिरंभूयश्चभूरिचेत्यमरः॥ विश्राणनंसागंत्यागंददातिमि
त्यर्थः सागोविहायनंदानमुत्सर्जनंविसर्जनं॥ विश्राणनंवितरणंस्पर्शनंप्रतिपादनं॥ प्रादेशनंनिर्वपणम
त्रेदानंचंडाख्यतिसंप्रसन्नाजन्माक्षराणिप्रविलोक्यतस्याः॥ आजानुबाहाद्विभूमिदेवाबालेतिसंज्ञांविद
धुःकृतायाः॥१८॥ प्रवर्जनमंहतिरित्यमरः दिदेशददौदिशअतिसर्जनेतस्माल्लिट्॥१७॥ नदतिदानानांखंडाः
समूहाः मकरमुकुरौदर्पणेखंडः समूहेसारदोबुधाविति सारस्वतकोशः तेषामाप्तिः प्राप्तिस्तयाप्रसन्नंतंसंप्रस
न्नः जानुभ्यामाङ्इतिआजानु आङ्मर्यादाभिविध्योरित्यव्ययीभावः जानुपर्यंतंदीर्घाबाहूभुजायेषांतेबाहे
ऽथभुजयोःयुमानितिदामोदरः तेपूर्वोक्ताः वृषोधर्मः सविद्यतेयेषांतेवृषिणोधार्मिकास्तेचतेभूमिदेवाश्चवृ
धार्मिकब्राह्मणाइत्यर्थः तस्याःकृतायाःजन्माक्षराणिजन्मलग्नंप्रविलोक्यप्रकर्षेणसंवीक्ष्यबालाइतिसं ॥७॥

ज्ञामभिधांसंज्ञयाबालानामित्यर्थः इतिनाम्निपातेनाभिहितेप्रथमाविदधुःबालाइतिसंज्ञांचक्रुरित्यर्थः॥१९
गृहइति ततःस्वपुत्रस्यानंतरंद्विजस्यकृष्णशर्मणःगृहगेहेगृहंगेहोदवसितमित्यमरः पुल्लिंगेतुबहुवच
नएवात्रोक्तः गृहाःपुंसिचभूम्न्येवेतिगृहशब्दोभूम्न्येवपुंसिचात्क्लीबइतिआणाक्रधाउपवासगृहंदेहेगो
हंपटहमित्यपीतिचंड्रगोमित्युक्तपुल्लिंगबहुत्वगुणतितेषुमध्येएकवचनांतमपिपुल्लिंगम्आहसमृद्धिःसंपत्तिः
नवृधेसमेधततनयाःकृताःपुत्राःअभवन्बभूवुः॥ तेचसप्तकाःसवधःअभूवन्एकाचमहिलावधूरिति
गृहेसमृद्धिर्ववृधेद्विजस्यसंतःसप्तकास्तनयाअभूवन्॥ निष्कामभावेनहरिंसभेजेतथापिदिष्टाकृतिपद्मनेत्रम्
१९॥ मूर्त्तिस्तदाज्ञानमपिस्वकीयंचक्रादबालाचरितैःसमग्रम्॥ वृद्धिंगताचाङ्गमसीकुलेचप्रेम्णाभजत्साभगवंतमी
शम्॥२०॥ त्रिकांडशेषः तथापिसर्वतःकृतोपभोगप्राशावपिसविप्रःदिष्टाआकृतिराकारोयस्यपद्मवन्नेत्रेय
स्यसचासौसचतंहरिंश्रीकृष्णंनिष्कामभावेनभेजेसिषेवेअत्रतत्तनयोक्तिरभ्रातृकापरिणयननिषेधादस्याः
सभ्रातृकत्वापादनायअन्यथाअभ्रातृकाज्ञानेपुत्रिकाधर्मशंकयाकश्चिदपिनवरयेतेसेतदर्थमत्रतदुक्ति
र्निर्बाधवेयस्यास्तुनभवेद्भ्रातानविज्ञायेतवापितानतांपरिणयेत्कन्यांपुत्रिकाधर्मशंकयेत्युक्तेः अत्रविशेषस्त्वा

र्घग्रंथेभ्योऽवगंतव्यः ॥१९॥ भक्तिरिति सा मूर्तिरपि बाला एतन्नाम्ना प्रसिद्धासती तदा बाल्ये चरित्रैर्बालोचितखेला-
दिभिः स्वकीयमात्मीयं गृहादिभ्यः श्रेष्ठं तिसृत्राह्लादः तस्येयां देवाः स्वस्य चेति गहान्यंतगणसूत्रेण कुगागमः समग्रं
सकलं ज्ञानं बोधं चछादापाहृन्तवती सती चांद्रमसी चंद्रमसः इयं कला षोडशो भागः इव त्वङ्गिता सती प्रेम्णा स्नेहेन
ईशां भगवंतां अभजत् सिषेवे ॥२०॥ ऋबुद्धिरिति ऋबुद्धिः शोभनाम नितरां सौंदर्यकंदरता च गुणाविनयादयश्च तैरु-
पपन्ना युक्ता सा बाला कपिलस्य कर्दमसूनोः मातादेवहूतिसादृश्यसहन्त्री अभवत् अधवलाः धवलास्तथा संपद्य-
सुबुद्धिसौंदर्यगुणोपपन्ना तुल्याभवत्साकपिलस्य मात्रा ॥ यत्राश्लदीयं धवलीकृताशं वस्कंधरायां प्रथितं बभूव ॥२१
तां बाल्येऽप्युरुभाग्ययुक्तां श्रीकृष्णभक्तिप्रवणामजस्त्रं ॥ गुणोद्भवं भक्तिरिति स्वनाम दधार लोकं तेनजनोऽनुहू-
व ॥२२॥
मानाः हताः धवलीकृताः आशाः दिशो येन तत्तत्त्व भास्ति योगे संपद्यकर्त्तरि च्विरिति च्विः अस्य च्वावितीत्वं वे
रपृकस्येति वेर्लोपः आशा नृसा दिशः प्रोक्ते ति विश्वः दिशस्तुककुभः काष्ठा आशाश्च हरितश्च ताइ समस्तस्य त-
दीयं बालेयं यत्रः कीर्तिः स्कंधरायां पृथिव्यां प्रथितं विस्तीर्णं विस्मातं वा बभूव यत्सीमातमावलोकनात् हिमंतरेस्थ
मायोविनो पितृह्वज्ञोलब्धपेपदनुष्ठितसन्मार्गे भर्त्रा प्रहन्त्वा बभूवुरिति भावः ॥२१॥ तामिति जनो लोकः जनो ॥८॥

लोके महर्लोकाख्ये लोके च पामरे इति विश्वः मे दिस्मो उरुणा अधिकतरेण भाग्येन दैवमैश्वर्येण वा युक्तामपि तां बा-
लां बाल्ये खेलोचितवयस्यपि अजस्त्रं निरंतरं श्रीकृष्णस्य या भक्तिस्तत्र प्रवणां तत्परां वीक्ष्य आवलोक्य गुणाद्भक्तियु-
णाद्भवो यस्य तत्तथोक्तं ॥ भक्तिरिति नाम भक्तिसंज्ञां दधार अवस्थापयामास घट् अवस्थाने अस्य लिटि रूपम्
भक्तिरितीति नानिपातेनाभिहिते कर्मणि प्रथमा च कारेसमर्थः तेन भक्तिरिति नाम्ना तुष्टाव आहूतवान् ह्वयतेः ।
स्पर्द्धायामाङ् कर्त्तरि लिट् ॥२२॥ तदीयेति कुलं च रूपं च वित्तं च विद्या च तान्यादेयापेयानि तैः गुणौघैर्वरैर्विलोक्य श्रेष्ठ
तदीयपित्रा कुलरूपवित्तविद्यादिभिः श्रेष्ठतमं गुणौघैः ॥ समेहि धर्मं तनया विवाहं विज्ञाय कर्त्तुं तपसा वरेण ॥२३
तमं धर्मं वा लवन्नार्मद्विजस्कृतं विज्ञाय ज्ञात्वा तपसा धर्मेण वरेण नामात्तभावविधेयेन सस्त्रांगुज्ञायणादौ सा धर्मे लो-
कांतरेऽपि चेति विश्वः सह तनया विवाहं स्कृता परिणयनक्रियाकर्त्तुं विधातुं तदीयपित्रा भक्त्यपरनाम बालाज-
नकेन समेहि समैच्छ इच्छायामस्मात्संपूर्वात् भावकर्मणोरिति भावे तङ् छ्विलुङी तिच्चिः चिण्भावकर्मणोरि-
ति च्लेश्चिणादेशः चिणो लुगिति तन्नाह्वस्य लुक् आडजादीनामिसाडागमः आटश्चेति वृद्धिः तामातरि विलोक्य
श्रीष्टगुणानां तस्मिन्स्त्रागनात स्तित्राय मेव योग्योवरः इति निर्धारितः इत्यर्थः ते च गुणा युक्ताः स्मृताम् कन्या वरय

तेरूपंमाताविर्त्तंपिताश्रुतंबांधवाःकुलमिच्छंतिमिष्टान्नमितरेजनाइसादिनामितास्त्ररयाममेयुक्ताःसं
॥८॥ तितेतननतोक्षेपाः॥३३॥सइति अथैवंभूतेछोसस्यनंतरंसरूदमन्नामा हेविप्रआदौवाग्दानंवाचाकन्याविवाहं
विधायकृत्वाइहास्मभ्यमेतंबालन्नामद्विजवरपितरंआनयआहर इतिउक्ताकंचितुद्विजंब्राह्मणोत्संप्रेषात्
सप्रेषिताद्विजःतथाविदधोचकारतत्तदाहर्षात्कृतकौतुकक्रियाद्धर्षात् आम्रुत्तीघ्रंबालन्नामोवरतन
कःतमैःसहआगमतआगतः॥३४॥विधायेति अथेतिविशेषःबालन्नामोद्विजागमनानंतरम् असोरूदम
सप्ताहिणोद्विप्रतमानयेहवाग्दानमादौतुविधायतमैः॥उक्ताप्यकंचित्सतथाविदधौतबालन्नामागमदाशु
हर्षात्॥३४॥विधायपाणिग्रहणंतयोर्मुदापुरोधसाम्नायविदांवरीयसा॥चकारदानैर्विविधैस्तदीप्सितैर्द्विजा
दिसत्कारमसौयथाविधि॥३५॥ नाम्नाद्विजःआम्नायोवेदस्तंविदंतियेतेषांश्रुतिःश्रीवेदआम्नायइसमरः
वरीयसाश्रेष्ठेनपुरोधसासंस्कारंविधायकद्विजेनप्रयोमकर्त्रा तयोर्वरवध्वोःपाणिग्रहणंविवाहसंस्कारंमुदा
हर्षेणविधायचकारयित्वा तयोर्वरवध्वोस्तेषांद्विजानांवाईप्सितानिप्राप्तुमिष्टानितैःविविधैरनेकप्रकारैर्व
दानैर्वितरणैःयथाविधिदानस्यविधिमनतिक्रम्य अव्ययंविभक्तीसादिनायथार्थेऽव्ययीभावःद्विजाआदयो ॥८॥

मुख्यायेषांबंधुवर्गाणांतेषांसत्कारःयथायोग्यंपारिवर्हस्पर्शनंतंचकारविदधौ॥स्वलयज्ञेविवाहेचसंक्रांतौ
ग्रहणेतथा॥पुत्रेजातेव्यतीपातेदत्तंभवतिचाक्षयमितिशास्त्राद्विजसत्कारविधानंअक्षयपुण्योपलब्धय
एव अमेषांतुव्यवहारप्रसिद्धेवंशस्थंवृत्तंलक्षणंतूक्तंप्राक्॥३५॥सइतिश्रुतानिशास्त्राणितेषांपारमव
सानंहष्टवानसतथोक्तःहशःक्वनिप्तिकर्मण्युपपदेहशेःक्वनिप्पारपरतदंतांतइतिविश्वःप्रांतोऽवसानं
सप्रसिद्धोधर्मजनकत्वेनख्यातइसर्थःबालन्नामासकलंसमग्रंसतांधर्मप्रतिपादकानांग्रंथानांसारंरहस्यंवि
सबालन्नामाश्रुतपारदृश्वासग्रंथसारंसकलंविलोक्य॥पीवाचतस्यैस्फविशेषधर्मान्पतिव्रतानांनिखिलानुदास्
न्॥३६॥दुहीयसीतत्रनिरीक्ष्यतस्याःस्थितस्सपसौप्रणयाद्गुणज्ञः॥अथोपिताचस्यैयगुणज्ञतुरोधिचक्रेसुदाप्रेम
वतीतिनाम॥३७॥ लोक्यावगम्यउदारान्महतःउदारोदातृमहतोरिसमरःपतिव्रतानामेकपत्निकानांसाध्वीनां
स्त्रीचरित्रातुसतीसाध्वीपतिव्रतेसमरःनिखिलान्सर्वेसग्रंथसमाहृतानुस्फविशेषधर्मान्सामान्यास्त्रकाभिप्रि
त्काभिप्रिसाध्यंतएवएनांस्त्रत्राणोभनान्विशेषहृष्टानिसर्थःतस्यैवस्त्रकायैप्रोवाचोक्तवान्॥३८॥दुहीयसीमिति
अथोपतिव्रताधर्मश्रुसनंतरंगुणज्ञःपातिव्रसादिपुत्रीगुणज्ञःसःपिताकृदमन्नामाप्रणयात्स्नेमाश्रिसस्यस्नेपेपं

हरिसं॰ चमी प्रणयः प्रीतिर्विश्रंभे याच्ञाप्रसरयोरपीति विश्वः तस्याः कलायाः तत्र धर्मे परमोत्साहमिति च इद्धीयसी इद्ध सर्ग॰ ५
॥१०॥ तरां स्थितिं निरीक्ष्य हृष्टा स्वीयगुणानुरोधि स्वीया आत्मीया ये प्रेमादयो गुणास्ताननुरोद्धुं शीलमस्येति तथो
क्तं आत्मगुणानुसरणशीलमित्यर्थः प्रेमवती स्वन्वर्थं नाम संज्ञां मुदा हर्षेण चक्रे विदधे कृत्यत्रात्ताविति ताच्छी
लेणिनिः ॥१५॥ नार्य इति नार्यः सीमंतिन्योऽपि नारी सीमंतिनी वधूरित्यमरः हरेः स्वरूपमाकृतिः सौंदर्यं रूपं स्व
भावे सौंदर्ये इति विश्वः तस्य स्मरणे प्रियं यस्याः सा तस्याः विषये पुत्रगृहादिषु अनासक्तिमसंगं निःसंगतायाः ॥ प्र

नार्यः पि तस्याः प्रविलोक्य शीलमपांसुला धर्मरता बभूवुः ॥ हरिस्वरूपस्मरणप्रियाया निःसंगतायाः विषयेष्व
सक्तिं ॥१६॥ कृताय तस्मै समनुव्रताय भक्तिं हरेर्धर्मयुतामनन्यां ॥ एकादशीमुख्यवरव्रतानि प्रोवाच तस्मै ति
विवृत्य सा ॥१७॥
भार्याः तस्याः प्रेमवत्याः शीलं सहजं शीलं स्वभावे सद्वृत्त इति विश्वः प्रविलोक्य दृष्ट्वा पांसवो
दोषास्तान् लांति आदद्दत इति पांसुलाः स्वैरिण्यः आतोऽनुपसर्गे क इति कः आतो लोप इटि च इत्याल्लोपः पांसुलाः
स्वैरिणी पांसुला च स्यादित्यमरः ता अलमत्यर्थं अपि इदं यस्याः सुः शुंभयश्रकृत्यां रात्र्यां च स्तुष्य विवेकः पतिव्रतातासां ध
र्मेषु संगिनी वनेषु विशेषमुक्तेषु रतास्तत्पराः बभूवुः पतिव्रताधर्मानाचेरुरित्यर्थः ॥१८॥ सुतायेति सबालव्रा ॥१०॥

मो समनुव्रताय स्वमनुसृताय तस्मै हरिप्रसादमाप्ताय कृताय पुत्राय धर्मयुतां धर्मयुक्तां ॥ अनन्यामेकांतिकीं
हरेर्भगवतः भक्तिं एकादशीमुख्यानि व्रतानि चराणि श्रेष्ठानि यानि व्रतानि तानि निचवीः ध्याहार्यः सा च तस्मै भक्तिव्र
तेन पुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति नपुंसके कर्तृशेषः तयोः भक्तिव्रतयोः प्रीते रुचिकृत्विस्तस्मै ताद
र्थ्ये चतुर्थी प्रोवाच प्रकर्षेणोक्तवान् ॥१९॥ श्रीति श्रिया परमेश्वरत्वयो भार्यासीता रूपया वा युक्तः सवासौ राम
स्तस्य भक्ता उपासकास्तेषु उत्तरपदलोपी समासः वरीयसोऽतिश्रेष्ठस्य महद्याचवद्वेष्टावसानं पात्यस्वेन गुरुव्रतम्

श्रीरामभक्तेषु महत्कृतस्य वरीयसोऽर्चाविधिमाह सर्वं ॥ कुलेष्टदेवस्य महाव्रतस्य तदिष्टदेव्याः कमलाभिधायाः
॥२०॥ आपृच्छ्य पत्नीं गंतुमना मनीषी स कृष्णशर्माभिधमात्मगेहं ॥ तं शिक्षयित्वेति सुतं विनीतं कृतस्त्वतस्तेन तगाम
धीरः ॥२१॥
धीरेतः संतुष्यस्य तथोक्तस्य कुलस्य स्वकुलस्येष्टदेवो श्री इष्टदेवता तस्य महत्कृतस्य हनूमतः अ
र्चाविधिं पूजाप्रकारं सर्वं साकल्येन यथा तथा आह अकथयत् तदिष्टदेव्यास्तस्य कुलस्येष्टदेव्या श्री इति देवी तस्याः
कमलेत्यभिधानाम यस्यास्तस्या लक्ष्म्याश्च सर्वमर्चाप्रकारमाह ॥२२॥ आपृच्छ्येति इति पूर्वोक्तप्रकारेण तं वि
नीतं प्राप्तविनयं कृतं पुत्रं शिक्षयित्वा धर्मशिक्षामुपदिश्य आत्मनस्तस्य गेहं गृहं गृहं गेहोदवसितमित्यमरः ॥

गंतुमनोयस्यसतथाविधः तुंकाममनसोरपीतिमकारलोपः मनीषीपंडितः समग्रधर्मशास्त्रादिवेत्तां स·
बालब्रह्मचारीनंदरूपमनुष्याभिधंस्वस्कृतश्रुस्करांज्ञाप्रच्छ्य आज्ञाचेत्प्राप्तेइत्युक्त्वा तेनरूसत्कृतः पारिहार्यप्रद
नेनार्चितः धीरः स्वपुत्रस्सतत्रस्थितिसौदासीन्यप्राप्तिकालत्वाध्धृतधैर्यः सन्तृत्तगामागच्छत् ॥२१॥ ग्राममितिप्र
थितोविख्यातः प्रतापोयस्यासोब्रह्मवर्चोव्रताध्ययनसंपन्नितस्मंत्तेजः तेनसहवर्त्ततइतिस्याब्रह्मवर्चसंव्र
ताध्ययनर्द्धिरसिमरः व्रताध्ययनसंपन्निरिष्यतेब्रह्मवर्चसमितिहलायुधश्च रोकपद्येसमइतिरश्यकुपदंब्र
ग्रामंस्वकीयंजनकोवृषस्ससमाससमादप्रथितप्रतापः॥ सब्रह्मवर्चःपरिदीप्यमानःश्रीरूपपादांबुजसक्तचि
त्तः॥२२॥ श्रीधर्मदेवोगृहिणीसमेतोवेदोदितायेगृहमेधिधर्माः॥ संपालयामासयथावदेतान्दुःखेपिधैर्यान्न
चचालतेभ्यः॥२३॥ ब्रह्मवर्चसापरिदीप्यमानः सर्वतोभासमानः ब्रह्मवर्चः ब्राह्मे त्रयस्मह हस्तिभ्यांवर्च्चसकज्ञनभा
वस्कसमासांतविधेरनित्यत्वान्सिद्धः श्रीरूपस्यपादांबुजयोश्चरणकमलयोः सक्तमासक्तंचेतोतःकरणंय
स्यसतथोक्तः सः वृषस्यधर्मदेवस्यजनकः पितास्वकीयंग्रामंसमाससमादप्राप्तवान् ॥२२॥ श्रीतिश्रीर्गुणाजम
शोभातद्युक्तोधर्मदेवः गृहिणपायत्वासमेतोयुक्तः सन् वेदैरुदिताउक्तायेगृहमेधिधर्माः गृहेदारैर्मेधंतेसं ॥२१॥



गच्छंतेइतिगृहमेधिनोगृहस्थाः मेधृसंगमेचअस्मात्सुप्यजातावितिनिः तेषांधर्माः संतीतिशेषः एतानुक्तान्वेदोदिता
न्धर्मान्यथावत्संपालयामासयथावत्सालयांचक्रे अनायासेनयथार्थमयापालयदित्यर्थः दुःखेः पिदैन्याका
लजनितदुःखसमयेऽपि धीरस्यभावो धैर्यंतस्माद्धैर्यत्वात्हेतोः तेभ्योगृहमेधिधर्मेभ्यः नचचालरूरसारथि
संप्रेरितक्षुणाध्वगतरथनेमिरिवमन्वादिप्रणीताद्दृष्टाद्भ्रष्टाभूदस्यधर्मात्सलोनाभूत्॥२३॥ चक्रइति स
धर्मः परेषामप्येषांजनानांदोषान्नवदन्तत्कथनमकुर्वन्निषेधार्थेनत्राद्देनरूपकयेतिसमासः कुवाचोरुतु
चक्रेसवर्णाश्रमधर्मसंगंदोषान्परेषांनवदन्कुवाचः॥ वीक्ष्येतिलोकोत्दृदधर्मनिष्ठंचकारसंज्ञामितितस्यध
र्मः॥२४॥ इत्याणीश्रुपरानपृष्टीतिशेषः नवदन्परुषवाग्भाषणमकुर्वन्नित्यर्थः वर्णपतेवेदवाक्येनस्वाचारे
षुप्रेर्यंतेइतिवर्णाः वर्णचूर्णप्रेरणेकर्मणिघञ् आश्राम्यंतिस्वस्वंतपस्कुर्वंत्यत्रेत्याश्रमाः श्रमुतपसिखेदेच
आङ्पूर्वः हलश्चेतिघञ्नोदात्तोपदेशस्येत्यादिनावृद्ध्यभावः वर्णाश्चाश्रमाश्चतेषांधर्मो विद्यतेऽतिन्नाथितो
ऽत्रपेपात्मोपेषामितिवर्णाश्रमधर्मिणः अत्तिन्नाग्यनेइतिः तेषांसंगस्तत्रदान्तोश्रवणादिरूपस्तंचक्रेअ
करोदित्यर्थः स्वस्यधर्माचसारत्वादितिभावः इतीस्यलोकोत्तनः लोकस्यभुवनेजनइतिविश्वमेदिमोतस

हरिसं· देवशर्मणः इत्यत्रापद्यप्यचलोयोधर्मस्तत्रनिष्ठांस्थितिंनिष्ठानेनिष्ठास्थागतिनिर्वृत्तोऽत्रासङ्गोपसर्गेह्स सर्ग·४
॥१३॥ इ·निष्ठानिष्पत्तिनाशान्ताइत्यमरः निष्पत्तिरेवस्थितिरितिस्वामीवीक्ष्यविलोक्यधर्मःअयंसाक्षाद्विश्व
धारकोऽव्ययः धरतिविश्वमितिव्युत्पत्तेरत्रान्वर्थतायाभासमानत्वात् धृञ्धारणेऽन्येभ्योपिदृश्यत इत्यादिनामन्
इतिधर्मइतिसंज्ञामभिधेयंप्रवृत्तिनिमित्तमभिधानमित्यर्थः चकाराकरोत् ॥ १४ ॥ एकादशीतिकृष्णजनु
र्जननंजनुर्जननजन्मानीत्यमरः तस्यदिनंएकादशीचकृष्णजनुर्दिनंचतेआदीयेषांतानिचतानिव्रतानिच

एकादशीकृष्णजनुर्दिनादिव्रतानिसर्वाणिमलापहानि ॥ आचेरतुस्तौविषयेष्वसक्तौसदासदाचारपरावन
द्यौ ॥ १५ ॥ अङ्गैःस्वधर्मप्रसुरैरुपेतौभक्तिंहरेःप्रेमभरेणनित्यं ॥ एनमश्रयारण्यपदवोपमानांतौश्रद्धयाचक्रतुरीश्व
रस्य ॥ १६ ॥ तानिआदिशब्दाद्भगवतास्थिरफलव्रतनिषेधायादिमलापहानिपापक्षयणानिचतानिकानि
चिदित्सत्राहसर्वाणिसमानिव्रतानिसमः सर्वपर्यायः सन्नसतोपआचारः सतामाचारस्तस्मिन्परः प्रधानंययोस्तौ
तत्परौतत्परावितिवानास्त्यवद्यंदोषोयोगर्वेवाययोस्तौअवद्यपण्येऽपितिगर्ह्यार्थेवद्यन्तोनिपातितः तौचतौच
विषयेषुशब्दादिष्वसक्तावासक्तिरहितौतौदम्पतीसदा आचेरतुः अनुप्रासोऽलंकारः ॥ १५ ॥ अङ्गैरितितौभ ॥१३॥

क्तिधर्मौस्वधर्मः प्रसुर्येषांतैः अङ्गैर्ज्ञानादिभिः उपेतायुक्ताःएनसांपापानांचयःसमूहएवअरण्यंविपिनंतत्र
दवोवनवह्निरूपमानयस्यांस्तांदवदावौतुवनवह्नौवनेऽग्नुभावितिमेदिनीईश्वरस्यसर्वेनियंतुःहरेर्नारायणस्य
भक्तिंसेवांश्रवणादिनवविधांवाहरौभगवतिप्रेमभरेणप्रेमद्रवीभूतचेतसानित्यंश्रद्धयाप्रतिदिनकर्तव्यतयाम
पितस्यांसत्याद्धयेत्यर्थः चक्रतुर्विदधतुः ॥ १६ ॥ आसीदिति तयोर्भक्तिधर्मयोः उदारतेजामहाप्रतापः सूनुःपुत्रः
सुनुःपुत्रेऽनुजेरवावितिविश्वः आसीद्बभूवकथंभूतः किन्नामाचतत्राहरामस्येवप्रतापोयस्यअतएवरामप्रतापेन

आसीत्तयोःसूनुरुदारतेजारामप्रतापः सहितेनतस्मिन् ॥ ग्रामेवसंतौकृतरामभक्तावुपद्रुतौतावसुरैरनेकैः ॥ १७
धर्मारयःपापधियःसतांतेक्लेशप्रदाभक्तिमतांजनानां ॥ कृष्णोत्रिविदित्वाभुवनामईनाथचैरूविपक्षान्सततंधर्मात्म
नः ॥ १८ ॥ श्रीकृष्णभ्रातुर्बलस्यग्रहणंरामसमानप्रतापत्वाद्रामप्रतापसंज्ञयाप्रथितोऽभूदित्यर्थः तेनपुत्रेणसह
तस्मिन्नुत्कृष्टयोऽभिधेग्रामेवसंतौतौदंपतीअनेकैरसंख्यातैःअसुरैर्भगवत्प्रादुर्भावंभवंतंबुध्यावतीर्णैर्दितिजैः
कृतरामसंसतंतउपद्रुतौकृष्णपीडौ अभूतांबभूवतुः ॥ १७ ॥ धर्मारयइति धर्मारयोधर्मपत्न्याःपापेधीर्मतिर्येषांतेपाप
धियःतेधर्मापहवकारकाःअसुराःकृष्णीन्दुर्वासःशापधृतमनुजदेहान्मुनीन्विपक्षान्सततंबाधितुंविदित्वाज्ञात्वा

हरिस॰ सतांसाधूनांक्लेशश्चवहृदःदुःखकारकाः संतःभक्तिमंतोयत्रास्तभगवद्भक्तिभाजांपुत्रांसायांमतुपुत्तनानांलोकानां सर्ग॰५
॥१३॥ मभृत्रामस्तंते अर्हन्नायपीडनायधरित्रींपृथिवींचेरुर्बभ्रमुः धृतमनुत्तविग्रहान्हविपक्षपातिनोमुनीनुद्दाल्वानेः
विधृतमनुष्यविग्रहांसंतस्तानपीडयन्तिसर्थः ॥ ४८ ॥ भवेदितिकदनेहिंसायांप्रसक्ताः कृतासक्तयः तेल्पकराः ॥
यथायेनप्रकारेणनिसमदर्निशंवृषस्यधर्मस्यअनर्गमंदुःखंभवेत्स्मात् तथातेनप्रकारेणचक्रुरुपायान्विदधुत
सर्थः तेभ्योःक्रूरेभ्योभीतिस्तद्भीतिस्तद्भीतेरितितद्भीतितः पंचमासास्तमिन्सधर्मः सदारःसपत्निकःस्वगृहंहतु
भवेद्यथानर्गमवृषस्यनिसंचक्रुस्तथातेकदनप्रसक्ताः ॥ ऊर्वाससाकेतपुरंसदारस्तद्भीतितःसस्वगृहंविहाय ॥ ४९
अलब्धशांतिर्भृशमर्द्यमानस्तत्राप्यसौतैः सततंसहिष्णुः ॥ हित्वाकरोन्नंद्गुवितीर्थयात्रांविविक्तनर्कः सहितोगृ
हिण्या ॥ ५० ॥ स्वयोग्रामस्थंस्वभवनंविहायसन्काससाकेतपुरंमालक्ष्मीः कंक्रखंचताभामितंयुक्तंसाकेतंतत्त्वत
सुरंसकोसलांसाकेनंकोशलायोध्याइतिहैमः ऊर्वासतत्रावासीदिसर्थः तृपान्वधाऽवमदइतिकर्मलम् ॥ ४९ ॥
अलब्धेति तत्रापिअयोध्यायामपि तैःक्रूरैः अर्द्यमानः पीड्यमानः सततंनिरंतरम् सहिष्णुर्महादुःखादिसह
नशीलोःपिअलंदकृजिसादिनासहत्नेरिष्णुर्भृशयः भृशामसंतम् अलब्धशांतिः अनुपागतचित्तविश्रामःकुतः ॥१३॥

गृहिण्यापत्न्यासधर्मचारिणीपत्नीजायाचगृहिणीगृहमितिहलायुधः सहितोयुक्तःसपत्निकानांप्रवासेऽसं
तदुःखान्निरितिभावः तथापिविविक्ताःशुद्धाःतर्कांकुहायस्यसःअसौधर्मःतत्साकेतपुरमपिहित्वापहाय ॥ भु
विएधम्यांतीर्थयात्रांजलप्रधानस्थानप्रयाणंअकरोत् ॥ ५० ॥ नदीतिनद्यश्चसरांसिचगर्त्ताश्चतडागानिचदेव
खाताश्चऊदाश्चप्रस्रवणानिचतेषुनिसंस्नानंकुर्वन्यथोपलब्धेषुतेष्वमतमेस्नानमाचरन्तिसर्थः तत्रनदी
अत्रोष्णसलिलास्रवंतीग्रीष्मतोष्णत्वसलिलाक्वस्थसरित्स्नाननिषेधात् तथाचनिगमेयाःशोषमुप
नदीसरोगर्त्ततडागदेवखातऊदप्रस्रवणेषुनित्यम् ॥ स्नानंसकुर्वन्नुदकूपवापीतोयेषुचैवायतनेष्वगच्छन् ॥ ५१
गच्छंतिग्रीष्मेकुसरितोभुवि तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगानादितिहस्तसहस्राधिकपरिमाणतडागा
च्चन्यूनंसरःगर्त्तस्वरूपमुक्तंकासायनस्मृतौधनुःसहस्राण्यष्टौचगतिर्यासांनविद्यतेनतानदीशब्दवाच्यागा
र्तास्तेपरिकीर्तिताइतिगर्त्ताःअकृत्रिमाःक्षेत्रविशेषाः व्रह्मयोमादयइतित्रिस्थलीसेतौसहस्रद्वयाधिकह
स्तपरिमाणःकृत्रिमोजलाशयस्तडागःदृशिहरस्कगदालोलप्रभृतिदेवनिर्मितएवतडागवाचश्चवाप्यकृसाहृदे
वैःखातंयत्सर्यतेतत्देवखातंयथाब्रह्मसरःस्तिमितप्रवाहोऽतिगंभीरजलोनद्येकदेशोऊदःप्रस्रवणंनिर्झरः

पर्वतादेः प्रस्पंदमानस्तोकजलप्रवाहः सर्थः एतेषु नित्यस्नानं स्मृतिभिरुक्तत्वात् ।तथा च मनुः नदीषु देवखाते
षु तडागेषु सरःसु च स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु चेति दक्षस्मृतौ तु स्नानं चाह त्रिमेतत्त्वडसुक्तं विष्णुपुरा
णेऽपि नदीनदतडागेषु देवखातसरस्सु च ॥ नित्यक्रियार्थं स्नायीत गर्त्तप्रस्रवणेषु चेति नदास्तु कूपास्तु वाप्यस्तु ता
सां तोयेषु जलेषु च नदः शोणप्रभृतयः नद्याद्यसन्निधाने वापीकूपादिष्वपि स्नातव्यमित्याह मरीचिः असन्निधा
ने सरितां तडागेषु सरःसु च कृतोपास्तु वापीषु कूपेष्वपि कदाचनेति मनुरपि असलाभे देवखातानां सरसां सरि

यत्र यत्र क्षितिजन्मभिर्गतस्तत्र तत्र सुतरामुपप्लुतः ॥ धैर्यवान्विपदि निर्जितेंद्रियः स प्रयागमगमन्महामतिः ॥ ५२ ॥

तां तथा उद्धृत्य चतुरः पिंडान्परकीये स्नानमाचरेदिति पंच पिंडान्समुद्धृत्येति तु मासेनोक्तं वापीकूपतडागोदकपानेषु
सप्त पंच त्रीन्वा पिंडान्समुद्धृत्येति कण्ठोक्तं खनित्रिता भागमुक्तं सप्त पिंडानिति योगियाज्ञवल्क्यः शौनकतु पिंडान्स्वापे
चाथ वैसुक्तं अत्र यथासामर्थ्यमित्यवस्थया येति हेमाद्रिणा व्याख्यातमित्यलं तत्प्रपंचेन नित्यस्नानं कुर्वन् सन्
आयतनेषु क्षेत्रेष्विति श्रीधरस्वामी क्षेत्राणि सिद्धस्थानानि क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोरिति मेदिनी
आगच्छन्जगाम ॥ ५१ ॥ यत्रेति स धर्मदेवः यत्र यत्र येषु येषु तीर्थादिषु गतस्तत्र तत्र क्षितिजन्मभिर्द्विजैः कृतराम स 



नम् उपप्लुतः पीडितोऽपि निर्जितानींद्रियाणि येन सः अत एव विपदि धैर्यवान् धृतियुक्तः महामतिर्बहुबुद्धिमा
न् प्रयागं तीर्थराजं अगमत् ययौ ॥ ५३ ॥ आम्नायेति आम्नायो वेदस्तत्प्रणीतस्त्वाचारः आम्नायाचारः शाकपार्थि
वादित्वान्मध्यमपदलोपि समासः तत्र निष्ठो नितरां स्थितो हरेर्भगवतश्चरणावेव सरोजन्मनी कमले तयोः सन्नम्प्र
हितो गंधः सुगंधस्तस्य यो रसः आस्वादः अनुभवस्तस्य दानं ग्रहणं तस्माद्भुत्थः समुत्पन्नो यो हर्षः स एव लघुर्महान्नु ज
लधिः समुद्रस्तस्य ये महावीचयो लहर्यस्तेषु मग्नमंतरालमंतःकरणं ययोः स्रोतस्थोक्तौ दानवैर्दनुजैः अर्द्यमानो

आम्नायाचारनिष्ठो हरिचरणसरोजन्मसद्गंधरम्यास्वादादानोत्थहर्षोल्लघुजलधिमहावीचिमग्नांतरालौ ॥ कुर्वंतौ
भक्तिधर्मौ वनितरामुरुतपोदानवैरर्द्यमानौ प्राप्तावास्तां प्रयागं विमलमतिमतौ तौ प्रियौ सज्जनानां ॥ ५३ ॥ स्नातां च
क्रे त्रिवेण्यां मनसि हितरुदयस्तत्र धीरः ससंध्यां रामानंदो मुनींद्रः श्रितसकलजनाज्ञानविध्वंससूरः ॥ प्रागात्क्षिप्ये रूपे
तो गुणनिलयहरेः पोषयन्नत्र भक्तिं तत्पेक्षा रुष्टचित्तो गुरुवरममघं तं च वंदे विनीतः ॥ ५४ ॥
पीड्यमानौ विमलामतिर्वि
द्यते ययोस्ता मिति विमलमतिमंतस्तेषां सज्जनानां सत्पुरुषाणां प्रियौ अनितरां रात्रिंदिवं उरु अत्यंतं तपः कुर्वंतौ भ
क्तिधर्मौ प्रयागं प्राप्तावास्तां स्रग्धरा छंदः भ्रमैर्यानात्त्रयो एत्रिमुनियतिर्युता स्रग्धराकीर्तितेयमिति लक्षणात् ॥ ५३ ॥ स्ना

त्वेतिधीरः सधर्मदेवः तत्रप्रयागे त्रिवेण्यांत्रिवेणीसंगमे स्नात्वास्नानंकृत्वाहितंसावधानंहृदयंचेतोयस्यसतथोक्तः
मन् संध्यांसंध्योपास्तिंचक्रेकृतवान् तदेतिशेषः तस्मिन्क्षणेश्रिताश्रिताश्रितायेसकलजनाः सर्वलोकास्ते
षामज्ञानध्वंसोऽज्ञाननाशनंतत्रसूरः सूर्यः सूरः सूर्यार्यमादित्यब्रध्नद्युमणिदिवाकराइत्यमरः गुणानांप्रथमस्के
धोल्कानांनिलयस्थानंसोहरिसूतस्यश्रीकृष्णस्यसमर्थः अत्रलोकेभक्तिंभजनंपोषयन्पालयन्कुर्वन् त्रिशिष्टैः स्वा
श्रितैकांतिभिः उपेतोयुक्तः मुनिवृंदः ननिर्जरणइतियथासमानिषेधात्समसमीत्समुरूपः रामानंदवाक्यवाचनार

इतिश्रीहरिसंभवाख्यमहाकाव्येहर्यंकेकविश्रीमदचिंत्यानंदवर्णिविरचितेधर्मदेवनामकरणभक्तिजन्मादि
वर्णननामाचतुर्थः सर्गः ॥ ४ ॥
आचार्यः प्रागात् आप्ययोतस्यरामानंदस्यपेक्षेक्षणंतयाकृष्णंप्रसन्नं
चित्तंयस्यसः ॥ विनीतोविनयवान् धर्मदेवः नाम्नयस्ययस्मिन्वालंगुरुवरंपरमार्थगुरुश्रेष्ठं तंरामानंद व
वंदेतुष्टावाभिवंदउवाचकारेसमर्थः ॥ पूर्वोक्तइत्ले ॥ ४४ ॥ इतिश्रीपदवाक्यप्रमाणपारावारीणधुरीणवि
श्वनाथभट्टात्मजदीनानाथभट्टशिष्यपत्तनक्षत्रवाकदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपाला
नंदमुनेंतःप्रेरितमतिमाधवदाससत्सहायमासावटंकदयाशंकरात्मजश्रीहरिकृष्णैकभक्तभीखा ॥ १५ ॥

नाथभट्टकृतौहरिसंभवकाव्यस्यविद्वज्जनाह्लादिमाख्यव्याख्यायांचतुर्थः सर्गः ॥ ॥ ४ ॥ ॥ समाप्त ॥
लि० रावलजेचामोरारजी सवत् १९५६ नामाहाशुदी १ एकमनेगुरुवासरे मेंथाणग्रामेसमाप्त ॥ ॥